**Roll No.** ..............................

# D–3358

## B. A. (Classics) (Part III) EXAMINATION, 2020

**(Compulsory)**

Paper First

**साहित्यम्**

*Time : Three Hours* ] [ *Maximum Marks : 75*

**सूचना** : सर्वे प्रश्नाः समाधेयाः।

1. निम्नांकितेषु पद्यद्वयम् सप्रसंगं व्याख्येयम्— 20

चिराद्वेगारम्भी प्रसृत इव तीव्रो विषरसः
कुतश्चित् संवेगात् निहित इव शल्यस्य शकलः।
व्रणो रूढ ग्रन्थिः स्फुटित इव हृन्मर्मणि पुनः
पुराभूतो शोकः विकलयति मां नूतन इव॥

हा हा धिक् ! परगृहवास दूषणं यद्
वैदेह्याः प्रशमित मद्भुतै रुपायैः।
एतत्तत् पुनरपि दैव दुर्विपाका
दालर्कं विषमिव सर्वतः प्रसृप्तम्॥





पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां
विपर्यासं यातो घनविरलभावः क्षितिरुहाम्।
बहोदृष्टं कालादपरमिव यन्ये वनमिदं
निवेशः शैलानां तदिदमिति बुद्धिं दृढयति॥

पाप्मभ्यश्च पुनाति वर्धयति च श्रेयांसि सेयं कथा
मंगल्या च मनोहरा च जगतो मातेव गंगेव च।
तामेतां परिभावयन्त्व भिनयै र्विन्यस्त रूपां बुधाः
शब्दब्रह्मविदः कवेः परिणतां प्राज्ञस्य वाणीमिमाम्॥

2. "एको रसः करुण एव" इत्युक्तेः भावं विशदीक्रियताम्। 10

अथवा

उत्तरे रामचरिते वर्णितम् प्रकृतिचित्रणम् सोदाहरणं प्रस्तूयताम्।

अथवा

प्रधाननायिकायाः चरित्रं सोदाहरणं चित्रीयताम्।

3. अधोलिखितेषु पद्यद्वयम् सप्रसंगं व्याख्येयम्— 20

कर्तुं यच्च प्रभवति मही मुच्छीलीन्ध्रामवन्ध्यां
तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः।
आ कैलासाद्विस किसलयच्छेद पाथेथवन्तः
संपत्स्यन्ते नभसि भवतो राजहंसाः सहायाः॥

पश्चादुच्चैर्भुज तरुवनं मण्डलेनाभिलीनः
सान्ध्यं तेजः प्रति नव जपा पुष्प रक्तं दधानः।
नृत्तारम्भे हर पशुपते रार्द्र नागाजिनेच्छां
शान्तोद् वेग रितमित नयनं दृष्ट भक्ति र्भवान्या॥

तत्रागारं धनपतिगृहानुतरेणा स्मदीयं
दूराल्लक्ष्यं सुरपति धुन श्चारुणा तोरणेन।
यस्योपान्ते कृतक तनयः कान्तया वर्धितो मे
हस्त प्राप्य स्तव्वक नमितो बाल मन्दार वृक्षः॥

शापान्तो मे भुजग शयनादुत्थिते शार्ङ्गपाणौ
शेषान् मासान् गमय चतुरो लोचने मीलयित्वा।
पश्चादावां विरहगणितं तं तमात्माभिलाषं
निर्वेक्ष्यावः परिणत शरच्चन्द्रिकासु क्षपासु॥

4. मेघदूतानुसारेण कालिदासस्य प्रकृतिप्रेम सोदाहरणं वर्ण्यताम्। 10

अथवा

यक्षिणी कीदृशी नायिका अस्ति ? तस्याः चरित्र-चित्रणं प्रस्तूयताम्।





5. सप्रसंग व्याख्या विधेया **एकम्**— 15

सर्गः प्रतिसंहारः कल्पो मन्वन्तराणि वंशविधिः।
जगतो यत्र निबद्धं तद् विज्ञेयम् पुराणमिति॥

अथवा

साहित्य विधा वधू एवं काव्यपुरुषस्य भारत भ्रमणं वर्ण्यताम्।

अथवा

आचार्य राजशेखरस्य सम्प्रदायः कः आसीत् ? संस्कृतसाहित्ये राजशेखरस्य प्रतिष्ठा स्थापनीया।